श्रीगणेशायनमः॥ श्रीगुरुगणपतये इष्टदेवताभ्यो नमः॥ देव्युवाच॥ भगवन्देव
देवेश लोकानुग्रहविग्रहः। त्वत्प्रसादाद्गणेशस्य श्रुतः पूजाविधिर्मया॥१॥
इदानीं श्रोतुमिच्छामि कवचं यत्प्रकाशितं। एकाक्षरस्य मंत्रस्य त्वया प्रीतेन चेत
सा।२॥ गुह्याद्गुह्यतरं देव पुरा प्रोक्तं मम भूत्किल। तदद्य विधिवद्ब्रूहि यदि ते वल्लभा
स्य हे।३। ईश्वर उवाच। शृणु देवि प्रवक्ष्यामि नाख्येयमपि ते ध्रुवे। एकाक्षरस्य मं
त्रस्य कवचं सर्वकामदं।४। यस्य स्मरणमात्रेण न विघ्नाः प्रभवंति हि। त्रिका
लमेककालं वा यः पठंति सदा नराः।५॥ तेषां क्वापि भयं नास्ति संग्रामे सं
कटे गिरौ। भूतवेतालकृत्याभिग्रहैश्चापि न बाध्यते।६। इदं कवचमज्ञात्वा यो भ
जेद्गणनायकं। न स सिद्धिमवाप्नोति मूढो वर्षशतैरपि।७। अघोरो मे यथा
मंत्रो मंत्राणामुत्तमोत्तमः। तथेदं कवचं देवि दुर्लभं भुवि मानवैः।८। गोपनीयं
प्रयत्नेन नाख्येयं यस्य कस्यचित्। तव प्रीत्या महेशानि कथ्यते कवचाद्भुतं।९।
एकाक्षरस्य मंत्रस्य गणक ऋषिरीरितः। त्रिष्टुप् छंदस्तु विघ्नेशो देवता पार

१

कीर्तितः ॥१०॥ गं बीजं शक्तिरंकारं सर्वकामार्थसिद्धये। सर्व [illegible] विघ्नविनाशाय
विनियोगो स्य कीर्तितः ॥ ११॥ ध्यानं॥ रक्तांभोधिस्थपोतो ल्लसदरुणसरोजा
धिरूढं त्रिनेत्रं पाशं चैवांकुशं वैरदनमभयदं बाहुभिर्धारयंतं। शक्त्यायुक्तं गजा
स्यं पृथुतरजठरं नागयज्ञोपवीतं देवं चंद्रार्द्धचूडं सकलभयहरं विघ्नराजं नमा
मि॥ १२॥ ॐ गणेशो मे शिरः पातु भालं पातु गजाननः। नेत्रे गणपतिः पातु गजकर्
णः श्रुती करः॥ १३॥ कपोलौ गणनाथस्तु घ्राणं गंधर्वपूजितः। मुखं मे सुमुखः
पातु चिबुकं गिरिजासुतः॥ १४॥ जिह्वां पातु गणक्रीडो दंतान् रक्षतु दुर्मुखः॥ वा
चं विनायकः पातु कंठं पातु मदोत्कटः॥ १५॥ स्कंधौ पातु गजस्कंधौ बाहू मे वि
घ्ननाशनः। हस्तौ रक्षतु हेरंभो वक्षः पातु महाबलः॥ १६॥ हृदयं मे गणपतिरुदरं
मे महोदरः। नाभिं गंभीरहृदयः पृष्ठं पातु सुरप्रियः॥ १७॥ कटिं मे विकटः पातु गुह्यं
गुह्यकपूजितः। कुमारगुरुरूरू मे जानुनी मे गणाधिपः॥ १८॥ जंघे जयप्रदः पा १
तु गुल्फौ मे धूर्जटिप्रियः। चरणौ दुर्जयः पातु सर्वांगे गणनायकः॥ १९॥

आमोदो मेग्रतः पातु प्रमोदः पातु पृष्ठतः। दक्षिणे पातु सिद्धेशो वामे विद्याधरार्चितः।
।२०। प्राच्यां रक्षतु मां नित्यं चिंतामणि विनायकः। आग्नेयां वक्रतुंडो मे दक्षिणस्यामु
मासुतः।२१। नैर्ऋत्यां सर्वविघ्नेशो पातु नित्यं गणेश्वरः। प्रतीच्यां सिद्धिदः पातु वा
यव्यां गजकर्णकः।२२। कौबेर्यां सिद्धिशः ईशान्यामीशनंदनः। ऊर्ध्वं विनायकः
पातु अधो मूषकवाहनः।२३। रात्रौ पातु गणक्रीडः संध्ययोः सुरवंदितः। पाशांकु
शाभयकरः सर्वतः पातु मां सदा।२४। ग्रहभूतपिशाचेभ्यः पातु नित्यं गजाननः।
सत्वरजःस्तमो वार्तां बुद्धिं ज्ञानं स्मृतिं दयां।२५। धर्मं चतुर्विधं लक्ष्मीं लज्जां कीर्तिं
कुलं वपुः। धनधान्यं गृहं दारान् सर्वतन्त्रीकरात्मजः।२६। य इदं कवचं देवि नियत
तः शुचिमान् पठेत्। एककालं द्विकालं वा त्रिकालं वापि भक्तितः।२७। न तस्य दु
र्लभं किंचित्त्रिषु लोकेषु वल्लभे। सर्वपापविनिर्मुक्तो जायते भुवि मानवः।२८।
यं यं चिंतयते कामं सुदुर्लभ मनोरथं। तं तं मे वैति सकलं षण्मासां नात्र संशयः।२९।
मोहनस्तंभनाकर्षमारणोच्चाटनादिकाः। स्मरणादेव जायंते नात्र कार्या विचार

णा।३०।सर्वविघ्नहरं सर्वग्रहपीडानिवारणं।धत्तेदं वा वचं देवि यो जपेन्मत्रमुत्तमं।३१।
२ न बाध्यते स विघ्नौघैः कदाचिदपि कुत्रचित्।भूर्जे लिखित्वा विधिवद्धारयेद्यो नरः शु
चिः।३२॥एकाक्षरस्य मंत्रस्य कवचं देवि दुर्लभं।बाहौ शिरसि कंठे वा पूजयित्वा ग
णाधिपं।३३।यो धारयेन्महेशानि स विघ्नैर्नहि बाध्यते।गणेशहृदयं नाम कवचं २
सर्वसिद्धिदं।३४।पठेद्वा धारयेद्वापि तस्य सिद्धिः करे स्थिता।न प्रकाश्यं महेशा
नि कवचं यत्र कुत्रचित्।३५।दातव्यं भक्तियुक्ताय कवचे शं स्करेश्वरं॥३६॥
॥ ॥ इति श्रीरुद्रयामले गणेशकवचं संपूर्णं॥ ॐ॥ ॐ॥ ॐ॥ हेरंभ प्रसन्न।

सप्तकद्वयं निरुज्ञो भवति। उद्यमकार्यार्थे क्षिप्रप्रसाददुष्टकुं[illegible]रान्विनाशार्थे
सकलवांछितकार्यार्थे मंत्रसुसिध्यर्थे सर्वत्र सहस्रं। एकाक्षरबीजगुरुः स
रं। तर्पणं कथ्यते। ८१॥ ॐ गं श्रीं रमायै स्वाहा। रमेशं तर्पः ४ ॐ गं ह्रीं गिरिजायै स्वा
हा। गिरिजेशं त० ४ रं रत्यै स्वाहा। पुष्पबाणं तर्प० ४ ॐ गं ग्लौं भूम्यै स्वाहा। महीवरा
हं त० ४ गं पुष्टिं गं कमलवासिने ह्रीं क्लीं श्रीं सर्वजनमोहिनीं त० ४ गं ह्रीं क्लीं गं अं
ग्लौं गं आमोदसहितं सिद्धिं गं समृद्धिसहितं प्रमोदं। गं कांतिसहितं सुमुखं॥
गं मदनरतिसहितं दुर्मुखं। गं मदद्रवासहितं विघ्नं त०। गं द्राविणीसहितं विघ्नहरं
त० गं वसुधारासहितं शंखनिधिं। गं वसुमतीसहितं विघ्ननिधिं। गं विनायकं॥
गं सशक्तिकं विरूपाक्षं। गं क्रूरकर्मालयं गणेशं। गं अपराजितं गणेशं। गं भूपा
लं गणेशं। गं वक्रविक्रमं गणेशं। गं ०ती आशक्तिसहितं गणेशं। एवं ज्वालिन्या
द्याशक्तिं सहितं गणेशं। प्रत्येकं गं इंद्राय सांगाय सपरिवाराय सायुधाय सशा
क्ताय तर्पयामि नमः॥ एवं लोकपालेषु तर्पणं कार्यं। ब्राह्मणे विष्णवे वेतर्थ्येव च॥

गं ह्रीं शक्तिसहितं गणेशं। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। प्रत्येकं शक्तिसहितं गणेशं। तथैव ॥
ग्लां ग्लीं ग्लूं ग्लैं ग्लौं ग्लः शक्तिसहितं गणेशं। प्रत्येकं संबंधः। दुं दुर्गायै नमः ॥
५ दुर्गासहितं गणेशं। क्षं क्षेत्रपालाय नमः क्षेत्रपालं॥ गं सरस्वत्यै० सरस्वतीं॥
गं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः प्रत्यक्षरे श्रीदेवीं ब्रह्मस्वरूपां
अंते गणेशं तर्पयामि नमः। १५। तर्पयेत्। ॐ कं खं गं घं ङं चं छं जं झं ञं
टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं॥ तथैव प्रत्यक्षर
प्रणवैः पूर्वकं अक्षरसहितं गणेशं तर्पयामि नमः। ३४॥ एवं कृत्वा। ८१॥
क्षेत्रपाल प्रतर्पणे। ८१। सरस्वतीतर्पणे। मूलमंत्रेण गणेशं। २४। गुरु
सहितं गणेशं। ४४५। गं गणका ऋषिसहितं गणेशं। ४४५। निचृद्गायत्री
छंदः सहितं गणेशं। गं विघ्नेश्वरो देवता सहितं गणेशं०। गं बीजसहितं गणे
शं। गं बिंदुशक्ति सहितं गणेशं। गं गां गीं गूं गैं गौं गः बीजरूपं प्रत्येकं गणे
शं तर्पयामि। गं अमृतार्णवं। गं इक्षुसमुद्रं। गं क्षीरसमुद्रं। गं घृतसमुद्रं॥

गं रत्नद्वीपस्फवर्णभूमिसहितं गणेशं० गं कल्पवृक्षसहितं गणेशं० गं सिंहासन
सहितं गणेशं० गं कल्पद्रुमसहितं गणेशं० गं सिंहासनपीठसहितं गणेशं० गं पी
ठमंत्रसहितं गणेशं। सिंहासनत्रिकोणमध्ये गं तर्पयामि॥ महापद्मकोणासनं गं त
र्पयामि॥ अंबुजासनसहितं गणेशं० गं सकलकमलादिदेवतं तर्पयामि। गं विराट्
रूपं गणेशं त० गं लक्ष्मीसहितं गणेशं। गं लंबोदरं। गं चतुर्भुजं। गं एकदंतं। गं ग
जाननं। गं उद्यत्कोटिर्क संकाशं। गं त्रिनेत्रं सर्पभूषणं। गं सिंदूराभं त्रिनेत्रं। गं पृथु
तरं जठरं हस्तपद्मैर्दधानं तर्पयामि॥ दंतं पाशांकुशेष्टं। गं अभयकरविलसद्बीज
पुराभिरामं। गं बालेंदुज्योतिमौलिं। गं करिवरवदनं दानपूर्णगंडं। गं भोगींद्राब
द्ध भूषं। गं भजत गणपतिं। रक्तवस्त्रांगरागं। बिल्वमभितेतरमं। रामं एवं विधिं
मारामं। एवं विधिं गं रमोः युगौ चक्रधरौ पुरोक्तौ एवं विधिं। गं वामदं। एवं। गं
न्यूनातिरिक्तं। गं सर्वसिद्धिसहितं गणेशं।४४४ गं ग्रामदेवतासहितं गणेशं। गं
स्थानदेवतासहितं गणेशं। गं कुलदेवतासहितं गणेशं। एवं कृते एकाक्षरगणे

५

राः स तुष्टो भवति॥ ॥ इति गुमेरुण्तर्पणं॥ ॥ अथ प्रयोगः॥ राजा प्रजादि स
६ लवश्यार्थे गं वरदसहितं प्रमोदं॥ आम्र वृक्ष प्रसूनै दूर्वांकुरच यैस्तर्प
णं। ५५०॥ गणेशं। ५५०। चतुर्थीमारभ्य चतुर्थीपर्यंतं कृत्वा। इष्टोपिव
श्यो भवति॥ अन्यकः पम्भु कामस्य चतुष्पदादि कामोटां क्लीं श्रीं विष्णु
सहितां तां श्री वृक्षप्रसूनै दूर्वांकुरैः जलैर्वा तर्पणं। ४४४। दुं गणेशं। ४४६॥
प्रतिपदामारभ्य द्वादशीपर्यंतं कृत्वा सर्वं वशा वश्कीनां भवति॥ दुष्टोट
नार्थे। गं दुष्टनिर्दलीनी सहितं दुर्मुखं। लाजापत्रै र्जलैर्वा तर्पणं। ३४०।
गणेशं। ३४०। अमावास्यामारभ्य तथा पर्वपर्यंतं कृत्वा। दुर्जनो शासनं
भवति। उत्साहनं सार्थे क्षेमदायिनी सहितं विघ्नं दुग्धासंचित दूर्वा ... भि
र्जलैर्वा तर्पणं। २५४। गणेशं। २५४। चतुर्थीमारभ्य पौर्णिमापर्यंतं कृत्वा।
उत्साह आनंदो भवति॥ संकटे निर्भयार्थे गं अभयासहितं विघ्नहर्तारं
दूर्वांकुरैर्जलैर्वा तर्पणं। ४२। गणेशं। ४२। चतुर्थीमारभ्य त्रिंशद्दिनपर्यंतं कृत्वा

निर्भयो बंधमुक्तो भवति॥ नष्टनिधि द्रव्यनिक्षेपार्थे गं शंखनिधिं तर्पयामि॥ कांचन
कनकदूर्वाजलैर्वा तर्पणं। ४४७। गणेशं। ४४७। चतुर्थीमारभ्य पंचचत्वारिंशद्दिनं
कृत्वा नष्टनिधि द्रव्यं गृहप्रविष्टं भवति। नष्टद्विपदचतुष्पदार्थे गं पद्मनिधिं रक्तो
त्पलैर्नीलोत्पलैर्दूर्वापंचकैः समुद्रगामिन्या नद्यास्तोयैर्वा जाण प्रतिष्ठामारभेत॥
कलान्यासं कृत्वा तर्पणं। ४४८। गणेशं। ४४८। शुक्लचतुर्थीमारभ्य सार्धमा
समेकपर्यंतं कृत्वा द्विपदचतुष्पदादिनि स्वगृहे प्रतिष्ठानि भवंति॥ उत्कटनेत्रार्थे गं
मदद्रवणार्थे तर्पयामि॥ गिरिकर्णिकापुष्पैर्दूर्वांकुरैः जलैर्वा तर्पणं। ४२९। गणेशं। ४२९।
प्रतिपदामारभ्य चतुर्थीपर्यंतं कृत्वा ततो देवतानिर्मत्सरो भवति॥ राजा प्रजा सभापं
ति घटादिनी स्तंभन मोहनार्थे मोहिनी द्रावरूपा अधःपुष्पैर्गोरोचनोदकसितैर्दूर्वा
कुरैर्जलैर्वा तर्पणं। ५४२। गणेशं। ५४२। प्रतिपदामारभ्य सप्तमीपर्यंतं विपरीत ज
प अयुत संख्याकं कृत्वा यशस्वी भवति। सर्वदुष्टा निरस्ता भवंति॥ स्त्रीवश्यार्थं॥
गं मदनां कुमाराय कामबाणाय श्वेतकुमुदै राजवृक्षप्रसूतैः पंचकैर्दूर्वाजलैर्वा त

चतुर्थीमारभ्य दिन पंचविंशति संख्याकं
तर्पणं॥११५॥ गणेशं॥११५॥ नानाकालेनानाव्यसनार्थेनानाकार्य
कृत्वा राजकन्या वश्या भवंति। नमोंत कार्याः॥
साधारणं प्रणवादि बीजं दूर्वांकुरेण॥५५॥ सर्वकार्य सिद्धिं भवति।
सर्वदेवता चतुमारभ्य एकविंशति दिनानि॥ पर्जन्यार्थेनाभिप्रमाणोदकमध्ये अशे
तर जपसाहस्त्रे एकशतं चत्वारिंशत्संख्याकं जपं कृत्वा पश्चात्तर्पणं। गडें ह्रायमेव स
हिताय तर्प्य कर्पूरपुलिके लवणपुलिकै वो तर्पणं। १४४। गणेशं। गं १४४। तत्सम
ये आरभ्य एकादशपर्यंतं आर्द्रादि विशाखापर्यंतं। नक्षत्र तर्पणं॥ ११॥ गं आर्द्रास
हितं गणेशं तर्पयामि। इत्या कृत्वा महावृष्टिर्भवति। त्रैं [illegible] मे गंउ मातुत्राय तर्पयामि॥
चूत प्रसूनैर्दुर्वांकुरैर्वा तर्पयेत्॥५५॥ गणेशं॥५५॥ शुक्ल चतुर्थीमारभ्य दि

नदिन विंशतिपर्यंतं स्नात्वा तर्पणोदकेन भार्यामभिषिंचेत्। वंध्यायां वत्सरमध्ये पुत्रदर्शनं भवति। पश्चात् गणेशप्रीत्यर्थं शतभोजनं कृत्वा यथाशक्त्या वा। सुखं निर्मितं भवति॥
क्षेत्रस्य मुखकाद्युपद्रवनाशार्थं गं मुखकवाहनाय तर्पयामि। दूर्वाजलैर्वा तर्पणं॥
५२१।५ पद्रवमारभ्य शांतिपर्यंतं कार्यं दिने सप्तभिरष्टभिर्वा शांतिर्भवति॥ ॥ ॥
इति तर्पणविधिः॥ ॥ अथ होमप्रकारः॥ ॥ लक्षहोमे महाकुंडं अथ द्वेष्ठे कुंडयोनिमेखलासंहितं स्त्रुक्स्त्रुवौ यथालाभं। सहस्रहोमे अरत्निमात्रं स्थंडिलं वा दशाहुति होमे नित्यहोमे उपासनस्थाने हुत्वा॥ आयांतु देवः पुरुषो महात्मा ब्रह्मा हरो वा हरिश्चंद्र सूर्यः। अन्ये च शक्रप्रमुखाश्च सर्वे विशंतु कुंडे सुरलोकनाथ॥ अग्निं प्रतिष्ठाप्य॥ ध्यानं। त्रिमेखलं त्रिपादं च सप्तजिह्वा समावृत्तं। मेषारूढं चतुर्भुजं गं जटामुकुटमंडितं। व्यजनं तोमरं चैव स्त्रुकस्त्रुवं दक्षिणे करे। कमंडलु अक्षमालं च घृतपात्रं तु वामतरे। एवं ध्यानं कृत्वा। स्वस्थिरासने उपविश्य। प्राणायामांगन्यासं करन्यासं विधाय मातृकान्यासं ध्यानं विधाय॥ रक्तोरक्तो गरागां०॥१॥ वश्यार्थे अभिनीत

र्थे रूक्षो रूक्षां गइति ध्यायेत्॥ मोक्षार्थे शुक्लः शुक्लां गइति ध्यायेत्॥ सर्वकामार्थे
पूर्वामुखं। वश्यार्थे धनार्थे उत्तरामुखं। अभिचारार्थे दक्षिणामुखं। मुमोक्षे पश्चि
म ऊर्ध्वमुखं वंशासने दारिद्र्यं स्यात्पाषाणे व्याधिसंभवः। भूम्यां दुःखमाप्नोति
पल्लवे चित्तविभ्रमः। १। चैलासने यशोवृद्धिः कंबले दुःखमोचनं। कृष्णाजि
ने ज्ञानवृद्धिर्मोक्षश्री व्याघ्रचर्मणि। २॥ नित्यहोमे दशाहुतिर्जुहुयात्। वश्याक
र्षणपुष्टितुष्टिस्तंभनमोहनोच्चाटनादौ शांतिके पापशुद्धौ वा होमः प्रशस्यते॥
घृतिकां ज्ञानश्री संपत्त्यै विजिगीषया शाऽ अब्रुवो हुनेत्। मारणे मोहनोच्चाटने
विद्वेषणे स्तंभने दक्षिणामुखः। तत्र दशाहुतयः। ॐ गं स्वाहा। ॐ गं श्रीं० ॐ २
ह्रीं० ॐ गं २ क्लीं०। ॐ गं ३ ग्लौं०। ॐ गं ४ ग्लौं गं०। ॐ गं ४ गं महागणपतये स्वा
हा॥ ॐ गं ५ महागणपतये वरवरदः स्वाहा॥ ॐ गं ५ महागण० सर्वजनं मे०॥
ॐ गं ५० वशमानय स्वाहा॥ दशाहुतयः। सर्वत्र होमादौ कार्यः मंत्रस्य सिद्धि
र्हवनं॥ ४४४॥ अष्टद्रव्यस्तेषु विभागः प्रत्येकं दूर्वाहुतयः ५०५५॥ नारि

केलं च कदली इक्षुस सक्तु तिला स्मृताः। मदो कपित्थ कालाजा अष्टद्रव्यमिति स्मृतं॥
त्रिमधुराक्तं कुहुयात्॥ स्वर्णादि कलशाद्रव्यार्थे नीलोत्पलैर्वा मधूकपुष्पैर्वा चंप
केर्वा हवनसंख्या। ८००० एतत्सकलसिद्धयै सर्वत्र दशाहुतयः। अनंतरं होमः। ॐ
गं स्वाहा। षट्कोणमंडलदेवतातर्पणे उच्चारयेत्॥ चतुःपदलाभार्थे गव्यपायसैर्वा दू
र्वांकुरैर्वा इक्षुखंडैर्वा रक्तोत्पलैर्वा अश्वत्थसमिद्भिर्वा हवनं। ५४४४। कृत्वा च तुः
पदलाभो भवति। धनधान्यार्थे पायसोदनेन सितोत्पलैर्वा श्रीवृक्षपुष्पैर्वा अपामार्ग
समिद्भिर्वा होमः। ८०४४ हवनं कृत्वा सकलसिद्धिर्भवति। मधुरादि सकलरसार्थे
मधूकपुष्पैः अर्कपुष्पैर्वा घृतप्लुतैर्हवनं। ४४४४। कृत्वा शर्करादि षड्रसलाभो भवति।
विद्यासक्तुपिष्टैर्वा कुमुदैर्वा मधूकपुष्पैर्वा घृतप्लुतैर्वा हवनं। १०२४४। कृत्वा सकलक
लाभवति। कन्याकामे इक्षुखंडैर्बिल्वाजैर्वा श्वेतांबुजैः पलाशसमिद्भिर्वा हवनं कृत्वा
।१८०४४। कन्यालभते। वरकामे पलाशपुष्पैः पृथक्कैर्वा हवनं। ८०००। वरसिद्धिर्भ
वति। यशःकामे दूर्वाभिर्वा जलैः कुसुंभपुष्पैर्वा हवनं। ६०४४। यशस्वी भवति॥ ॥

८

राजवश्यार्थे कदलीफलैर्वा राजवृक्षसमिद्भिः तिलपिष्टमोदकैर्वार्कसमिद्भिर्हवनं। ४९८। राजा तिमिं

द्रो वश्यो भवति। भूप एव धूर्तवश्यार्थे। उसलैर श्वत्थसमिद्भिर्वा हवनं। १०६९। नृप

धूर्त वश्यो भवति। पर्जन्यार्थे लवणैः कर्पूरकालिकैर्वा अंबुजैर्वा हवनं। ८०००।

दशांशं जपेत् समुद्रगामिन्यातीरे कृत्वा वृष्टिर्भवति। ब्राह्मणवश्यार्थे पालाश

समिद्भिर्वा हवनं। १४४। ब्राह्मणो वश्यो भवति। सकलकार्यार्थे अंजन घुटि

कैर्वा च्यूतसमिद्भिर्वा प्रसूनैर्वा उसलैर्वा मधुपुष्पैर्वा हवनं ५१२। कृष्णचतुर्थी

मारभ्य सिद्धि पर्यंतं कृत्वा सकललाभो भवति। सर्वत्र दशांशाहुत्यानंतरं गं स्वाहा

इति मंत्रः ध्यानं च पूर्ववत्॥ ॥इति होमविधिः समाप्तः॥ ॥अथैकाक्षर

गणेशकल्पः। श्वेतचंदन श्वेतार्कमूले गजदंते नवांगुष्ठमात्रं गणेशं कृ

त्वा चतुर्भुजं नागवक्त्रं त्रिनेत्रं लक्ष्मसूत्र लड्डुकफरशु त्रिशूल धृतं जटामु

कुटमंडितं सकपोलं भक्त्या पूजयित्वा तस्याग्रतः कुशासने अष्टौ जपेत्॥ सकृत्तु

९

रणो भवति। महापातकोपपातकेभ्यो निर्मुक्तो भवति। सकामसमर्थो भवति। तं गण
पतिं शिखां धारयेत्॥ संकेराजकुले संग्रामे अपराजितो भवति। सितकृषिक्रोना
रारक्तं रवविष्णुकोतो दधि मधु घृताक्तानां अष्टसहस्रं जुहुयात्। अष्टगुणो ला
भो भवति। सकलकर्माणि भवंति। नित्यं तंडुल होमः। आहुतिः। २४४५। सर्वकामानू
प्नोति। स्त्री वशीकर्तुकामो नवनीत घृतपायसं नाम्ना अष्टभ्यां चतुर्दश्यां म
होरात्रो पोषितो भक्तानुजपेत्। सा वश्या भवति। वशीकर्तुकाम उदुंबरपलाशैः समिद्भि
र्वा मधुकहोमः। अष्टसहस्रं जुहुयात्। वश्यता भवति। शताभिमंत्रित गोरोचनतिल
कं विधायः सर्वजनप्रियो भवति। अंजनं सप्ताभिमंत्रितं घुटिका सहस्रं जुहुयात् द
श गुणो लाभो भवति। न श्वद्विपद चतुष्पदं लभेत्। अथ गणपति विधानं। गजाननमा
वाहयेति। आवाहन मंत्रः। नमो विनायकायेति। पाद्यार्घ्य मंत्रः। वक्रतुंडाय स्वाहेति।
पुष्पादि मंत्रः। धर्माय स्वाहेति। विसर्जन मंत्रः। ॐ गं स्वाहेति मूलमंत्रः। शंकुकर्णा
य विद्महे गजवक्त्राय धीमहि। तंनो दंति प्रचोदयात्। अभयगायत्र्या आवाहना
दि पुष्पाजलिं विसर्जनं कर्तव्यं। ओं गणपतये स्वाहा। पूर्वे। ॐ गं पुरुजयाय स्वा

(8)

हा दक्षिणे। ओं गं दुर्जेयाय स्वाहा पश्चिमे। गं धूम्रवर्णाय स्वाहा उत्तरे। ओं गं मध्य वक्त्राय स्वाहा ऊर्ध्वे। प्रथमं लंबकर्णेत्यादि द्वादश नामानि मंत्रिणः।
१० सर्वकर्माणि येन सिध्यंति। नमो गणेश विधानं परिवारं पुरुषाकर्मीणि
स्त्रियाकर्षणं करोति॥ ॥ श्री॥ ॥ इत्येकाक्षर गणपति कल्पः समाप्तः॥ ॥ श्री गजाननार्पणमस्तु॥ ॥ श्री गुरुचरणारविंदाय नमः॥ ॥